स्वच्छस्वादुप्रसरसुभगा स्वामिनी वः कवीनां
वेगासञ्ज्ञां वहति महतीं वल्लभा पद्मयोनेः ॥ **29** ॥ 29

तीर्थे पुंसां शमितकलुषे तत्र सारस्वताख्ये
स्नात्वा सार्धं मुनिभिरनघैस्सम्यगुल्लासिताङ्गः।
विश्वं चित्ते विगतरजसि व्यञ्जयन्तीमशेषं
वक्ष्यस्यन्तर्बहिरपि परां शुद्धिमक्षेपणीयाम् ॥ **30** ॥ 30

तस्यास्तीरे सरसिजभुवस्सौम्य वैतानवेदिः
दिव्यं कुर्वन् द्रमिडविषयं दृश्यते हस्तिशैलः।
यस्योपान्ते कृतवसतयो यापयित्वा शरीरं
वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः ॥ **31** ॥ 31

सञ्चिन्वाना तरुणतुळसी दामभिस्स्वामभिख्यां
तस्यां वेद्यामनुविदधती श्यामळं हव्यवाहम्।
भोगैश्वर्यप्रियसहचरैः कापि लक्ष्मीकटाक्षैः
भूयश्श्यामा भुवनजननी देवता सन्निधत्ते ॥ **32** ॥ 32

लक्ष्मीविद्युल्ललितवपुषं तत्र कारुण्यपूर्णं
मा भैषीस्त्वं मरकतशिलामेचकं वीक्ष्य मेघम्।
शुद्धैर्नित्यं परिचितपदस्त्वादृशैर्देवहंसैः
हंसीभूतस्स खलु भवतामन्ववायाग्रजन्मा ॥ **33** ॥ 33

सारास्वादी सवनहविषां स्वामिनस्ते स देवः
शुद्धं चक्षुश्श्रुतिपरिषदां चक्षुषां भागधेयम्।
अङ्गीकुर्याद्दिनतममृतासारसंवादिभिस्त्वां
आविर्मोदैरभिमतवरस्थूललक्षैः कटाक्षैः ॥ **34** ॥ 34

मध्वासक्तं सरसिजमिव स्विन्नमालम्बमानो
देव्या हस्तं तदितरकरन्यस्तलीलारविन्दः।

